# Matribhumi Stava

# માતૃભૂમિસ્તવઃ

## Document Information

Text title : Matribhumi Stava

File name : mAtRRibhUmistavaH.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# માતૃભૂમિસ્તવઃ

(ગીતિકા) (સ્રગ્વિણી વૃતમ્)
માતૃભૂમિ સદા દેવભૂમિ શુભા
    દેવવર્યૈવૃતા વીરવર્યૈ સ્તુતા ।
ભારતી ભૂરિય રત્નગર્ભા મતા
    સ્વર્ણભૂમિર્મણીના સનિ સમતા ॥ માતૃ૦ ॥

માતૃભૂમેસ્તુ તુલ્ય ન કિઞ્ચિદ્ ભવે
    માતૃભૂમિસ્તુ સ્વર્ગાદપિ શ્રેયસી ।
પ્રાણદાત્રી સદા ચાન્નદાત્રી સ્થિતા
    પાલિકા પોષિકા માતૃરૂપા મતા ॥ માતૃ૦ ॥

માતૃભૂમિ સદા વન્દ્યતે સ્તૂયતે
    પુત્રરૂપા વયં સ્નેહભાજો મતા ।
માતૃભૂમેરૃણાન્નૈવ મુક્તિભવે
    પ્રાણદાન સદાઽપેક્ષતે માતૃભૂ ॥ માતૃ૦ ॥

ક્રાન્તિદૂતૈઃ સદા પ્રાણદાનૈઃ સ્તુતા
    શાન્તિદૂતૈઃ સદા સ્વાર્થત્યાગાદ્ વૃતા ।
ધર્મનિષ્ઠૈઃ સ્વદેહાર્પણેનાઽઽદૃતા
    દેશભક્તૈશ્ચ શૂલિ પ્રિયેવાઽઽદૃતા ॥ માતૃ૦ ॥

સ્વર્ગરૂપા સદા સ્નેહરૂપા પ્રિયા
    હૈમ-વિન્ધ્યાદ્રિમાલા-ગુણાલઙ્કૃતા ।
શસ્ય શ્યામા સરિદ્ધિ સુરક્તાઞ્ચિતા
    પદ્મજા શૈલજા નીરજેવાઽઽદૃતા ॥ માતૃ૦ ॥

અન્નદાનૈઃ સદા તોયદાનૈઃ સ્તુતા
    કન્દ-મૂલૈઃ સુપુષ્પૈઃ ફલૈર્મણ્ડિતા ।
પૂતપાસુ શ્રિતા તીર્થરાજૈઃ શુભૈઃ

માતૃશક્તિઃ સદા પ્રેરણાદાયિની ॥ માતૃ૦ ॥

શક્તિદાત્રી સદા સ્નેહસ્રોત પ્રિયા
સૌખ્યધામી સદા શાન્તિરૂપા મતા ।
તેઽઙ્ઘ્રિયુગ્મ સદા પાપ-સન્તાપહં
દોષહ રોષહ ક્લેશહ દ્વેષહમ્ ॥ માતૃ૦ ॥

વિશ્વશાન્તે સદા શિક્ષિકા શાન્તિદા
શાન્તિધામાઽઽશ્રયા શ્રેયસે જ્ઞાનદા ।
વિશ્વવન્ધુત્વ-શિક્ષાપ્રદા ભૈરવા
શત્રુ-સંહારિણી દૈત્ય વિધ્વંસિની ॥ માતૃ૦ ॥

ભારતીયા સમે તે સુતા લાલિતા
પાલિતા પોષિતા સ્નેહ-સંવર્ધિતા ।
ભ્રાતૃરૂપા ન તેષાં વિરોધ શુભ
સ્નેહ-ભાવોદય પ્રોતે કારક ॥ માત૦ ॥

ધર્મભેદો ન વા જાતિભેદ શુભો ।
વર્ગભેદો ન વા વર્ણભેદ શુભ ।
માતૃભૂમે સમુત્કર્ષહેતોર્મુદા
પ્રાણદાનં વરં વિત્તદાનં શુભમ્ ॥ માતૃ૦ ॥

Proofread by Mandar Mali

*Matribhumi Stava*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*